आगायदिति फलत्वेनैतदेवमेव प्राणादिषु पिस्तस्तभोगं देवेभ्य आगायदिति एवं सति देवार्थमेवैतद्गानं न तु भगवदर्थं यच्च प्रा
णस्यैव मनुच्यते तेभ्य एष प्राण उद्गायदिति तत्र प्रियया वागादिषु स्वनिष्ठभोगं देवेभ्य आगायदिति फलकं तथा नामस्ये
३० तेनोक्तमानेनैवं स्वात्मकत्वेनास्वरजपहेतुं भगवत्स्वं वयपवेति ज्ञात्वा तत्पे चागायदासन्यइति ज्ञायते अत एवान्यत्र।
वेद उक्तो त्रतत्कराउछायामप्यासुराणं नाश उक्तः अयं च भगवत्यात्मना पहास्य हि षन्मान्त्र्यो भवति यपवं चेदेति।
पद्यते तेन परब्रह्मणि दोषनिकिति किं नु वाच्यं यत्र तद्विभूतिरूपास्य स्यापि क्तरूपतो यो वेति सोपि गुणाधुक्तो दोषरहि
तश्च भवतीति कैमुतिकन्यायः सूचितो भवति एतेन लोके दोषत्वेन येधर्माः प्रतीपंतेन एव धर्मा भगवतीति निरूप्यमा
णा दोषत्वेन ज्ञेयाः किं तु गुणत्वेनैव च वस्तुतः पवनपाठ्यत्वादिति भावो ज्ञायते एवं भगवतस्सर्वथा भावे दोषसवधमा। ३०
त्कात पासतिमगुणा हानिचैव दं तत्र विशेषमाह हानीनूपायनशब्दप्रोषत्वात्क शाब्दं स्तत्स्वगान चतडक्तं तदावि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यादुत्युपक्रम्यते षां मिथः स्पर्द्धां मृत्योच्यते देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति तथेति
ते भ्यो वागुदगायद्यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पा॰
प्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मेति एवमेव प्राणचक्षुःश्रोत्रप्रभृतिषु पापवेदमुक्तोच्यते
अथेनमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पा
प्मनाविव्यत्सन् यथाश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना विष्वंचो विनेशुरिति छांदोग्येपि प्राणादिष्वेवमे
च पाप्मवेधमुक्त्वाः मुख्ये न तथेत्युच्यते एतावान्परं विशेषो वाजसनेयिनां गानकर्तृत्वं सामगानामहीयत्वेनोपास्यत्व
मुच्यते वागप्राणादीनामिति अत्रेदं हि संदिग्धं गानकर्तृत्वपोरुषाप्यत्वस्य चाविशेषेपि वागादिषु पाप्मवेधश्रवणमस्य
प्राणे कृतो नेति भवति जिज्ञासा न चास्योपासनाया विधेयत्वात्तस्तुत्यर्थमन्येषु पाप्मवेधवच्यते श्रेष्ठेति वाच्यं न हि मयो
जनायासततमपूर्वं चोदयति श्रुतिरिति वक्तुं शक्यं प्रमाणत्वव्याहतिप्रसंगात् एकत्वमतारकत्वे सर्वत्रापि तत्तुल्यक्यातङ्के
कोपि न प्रवर्त्तेतापि साक्षात्क्रियाफलत्वाभावेपि नासविरूपकत्वमर्थवादानां वस्तुतस्तु यदेव विद्यया करोति श्रद्धयोपि
निषदा तदेव वीर्यवत्तरं भवतीति श्रुतेर्ज्ञात्वाज्ञात्वा च कर्माणि जनो यमनुतिष्ठति विदुषः कर्मसिद्धिः स्यात्तत्र यथा न विदुषो॰
श्रा भवेदित्यादिवाक्यार्थ एवं वेदेतिवाक्यार्थचादो कर्मस्वरूपं ज्ञात्वा कर्मकरणे पूर्णफलमन्यथा नेत्यर्थवादानां फलोपकार्यंगत्व
रूपकत्वाज्ज्ञानार्थकामत उक्तोर्थः हि तेन पश्यामः इति प्राप्तिजमेवाहवेदादीति वाक्यानादिषु यः पाप्मवेधश्रादिपदाउप॰

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰पा॰ स्तेषामवयवप्रदेशोपसंहृत्यमकारेणैव गानं क्रियते न हि तदार्चिकवर्णधर्माणामवास्तवपत्वं ह्यारोप्यतीति हि गानात्मकत्वेमका
रस्य संभवत्येवं प्रकृतेपि ब्रह्मधर्माध्यारोपेण न तदात्मकत्वं जीवस्य संभवति नन्तु तत्त्वमस्यादिवाक्यैरत्यन्ताभेदबोधनाद्ब्रह्म
३१ तयेति चेन्न तत्राह तदुक्तमिति जीवब्रह्माभेदबोधनतात्पर्यमुक्तमित्यर्थः तथाच सारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति सूत्रे
णेति शेषः अपि च स्वजीवब्रह्मणोपासनस्य सामर्थ्यापादनेहेतुतोऽस्मात् तदन्तपापनस्य सामर्थ्यानुपपत्तेर्हेतुत्वमप्यज्ञायते न
याच्च पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति सूत्रे जीवस्य ब्रह्मांशत्वेनानैदेश्वर्यादि ब्रह्मधर्मवत्त्वाद्ब्रह्मणः
सकाशाद्धि भागेऽसति तदिच्छयाऽतद्धर्मतिरोधानस्य संसारित्वहेतुत्वमुक्तं यज्जदपि तदुक्तमित्यनेन स्मार्यते तदुक्तं न विस्म
31 र्तव्यं यथान्यशाखोक्तधर्माणामप्येकस्यां विद्यायामुपसंहारः एवं ब्रह्मनिष्ठधर्मा जीवे ध्यानप्राप्त्या बोध्यं तद्रूपेणावस्था
नमस्तीत्युपसंहारप्रकारेणैतस्य तद्रूपतां कर्तुं संपद्यते तत्त्वाभावात् यथा तस्य वाजसनेयिशाखायामप्येवमेतिने
तीत्यानन्देऽप्युपक्रम्य नव्यथित उत्पतेन ब्रह्मस्वरूपमुक्त्वा प्रतपताहं ब्रह्मास्मीति तद्धि यदपि विवक्षितरूपद्वयाभिप्रायेण पद्यते
अतः पापमकरं च मतः कल्याणमकरवामेत्यभेदभेदोपपत्तेः तद्रूपमनु तदुक्त्यादिना विमृष्य तन्नोमहिमा ब्रह्मणः
स्येत्यृचा वब्रह्मविदो माहात्म्यमुक्त्वा पद्यते तस्मादेवं विकातो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत्
सर्वमेनं सर्वं पश्यति सर्वोऽस्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति इत्यादिना विस्तरे उक्तमिति प ३१
द्यते यदेवं वेदेति अत्र हि पाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते ज्ञानस्य संसारमुक्तिहेतुत्वात् अपर्वणीपति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वान्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैतीत्याथर्वणिकैः पठ्यतेपरमपदेनब्रह्मोच्यतेतथाचसकार्यावि
द्यारहितःपरमपैतिनतदनेनतरंसाम्यमुपैतीतियोजनातत्रेदंविचार्यते साम्यंहिसमानजातीयधर्मवत्वंतच्चकिंस्व
रूपधर्मैरशेषतन्निष्ठधर्मैर्वाभवतितत्राद्यःपक्षोब्रह्मणासमंनसंभवतिनतत्समश्चाभ्यधिकश्चदृश्यतइतिश्रुति
विरोधात्तथाचएवपक्षोत्रमन्तव्यस्तत्रकेतेधर्मैः साम्यमिहोच्यतइत्याकांक्षायामाहक्ष्मानाविति ब्रह्मणःस
काशाद्विभागोजीवस्यहानिशब्देनोच्यते तथाचतत्संसारन्यायेयधर्मीजीवतिष्ठन्कूटोम्युदायोभगवद्विकृष्यतिरो
हितास्तेब्रह्मसंबंधेसतिपुनराविर्भूताउतितेवतत्त्वमित्यर्थः भगवद्दानेनदादीनीपूर्णाज्ञोविज्ञानसदीत्वामलित्वाज्ञात्वेवसंमे
दर्मैःकृत्वाब्रह्मसाम्यंजीववपचर्यैनसाम्यमुपैतीति वस्तुतस्तनेतरापिधर्मैःसाम्यमितिभावःअतएवतत्समइति
श्रुतिरविरुद्धा अतएवसूत्रकृतासाम्यमुपैतीतिसाम्यापादनशब्दमात्रनतुसाम्यपदार्थःस्वारस्यकोऽस्तीतिभावप्रकटना
यशब्दउक्तः ननुतैरेवधर्मैःसाम्येनेतरैरित्यत्रकोहेतुरित्याकांक्षायामाह उपापन्नशब्दप्रोपलत्वादितिपरममुपैतीतिय
उपापन्नशब्दस्तत्त्वेषत्वात्साम्यापादनस्येत्यर्थःब्रह्मसंबंधहेतुकत्वादानशायाविभौवस्यतदैवस्तंमापापनकथानात्ते
रेवधर्मैःसाम्यमभिप्रेतमितिभावः नद्यानेदादीनांब्रह्मधर्मत्वात्तेस्तत्साम्यकथनेनतदभेदमेवगमयतीत्याशंक्यतदधर्म
वत्त्वमात्रस्यनतदभेदसाधकत्वमित्यत्रदृष्टांतमाह ऊर्णेत्यादि ऊर्णान्पेदेवर्यैःसमन्धत्वाम्यग्निछेमादिपागेषुय
स्तोत्रनाम्स्याप्येते तदानत्संबंधयद्धेदस्त्वन्सपागनेतहूरित्यर्थः तत्राभिताम्ध्वरनान्नमाङ्गथ्याइवधेनवइत्यचियेवणा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ.र. पापपादेरभक्तत्वात्तज्ज्ञानमार्गीयत्वं लभ्यत इत्यर्थः ननु एवं चेदेतिमामावचनाच्छ्रेष्ठोत्तमविदोऽप्येवमेवेति चेत्तत्रा
३२ ह तथा त्वन्येन त्वया ज्ञानानन्तरमपि पापयते ते भक्तिमार्गीये भ्यो न्यूनत्वमित्यर्थः उक्तवचनं नूनं प्रोपपत्ति दृष्टान्तेन ज्ञाप्यते न
नु भक्तिमार्गीयाणामपि गोपस्त्रीणां दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमं
गला इति वचनेन तदुक्तनसुकृतयोरपि हानिश्रवणात् पूर्वोक्तवचनेन विरोध इत्याशंक्याह अनन्तरं पठति छेदनउभ
याविरोधात् उक्तात् तथा च भक्तिमार्गीयाणामपि पूर्वं पुण्यनाशः समभावदिष्ठा विशेषतो भक्तेः पूर्वमेव पापना
शनिरूपकात् तत्राशनिरूपकावचनयोरविरोधाद्धेतोर्भक्तेः पूर्वमेव पापनाशस्यावश्यकत्वमित्यर्थः एवं सति भक्तेः पूर्वमे
32 व तत्राशत्वत्सर्गिकास्मकश्चिद्विशेषेष्ठमायतो यत् इति भावो ज्ञापितो भवति अत्रेच्छाविशेषे वक्तव्ये च हन्तेपि किंचि
दुच्यते चिकीर्षितलीलामध्यपाति भक्तानसोपयोग्ये देहवत्त्वेन समग्रणाविग्रहानवाप्तकतादिप्रज्ञा इति ज्ञापयितुं
कतिपयगोपीस्तद्विपरीतधर्मयुक्ताः कृत्वा तस्यां दृशायां स्वमार्गमात्रप्रतिबन्धकारणपितास्वयमेव तद्दर्शनाशयित्वा
स्वलीलामध्यपातिनीः कृतवानिति तत्र तावता सार्वदिकपापाभावो भवतीति न हि मे च प्रतिबन्धशक्तिरस्मिन्
हक इति तत्स्वभावत्वमेव तस्य सार्वदिकमिति वक्तुं शुकेन एतच्च श्रीभागवते दशमस्कन्धविवृतौ प्रपञ्चितमस्मा
भिः गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ननु सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्निति तमे ३२
वं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय इत्यादिश्रुतिभिर्ज्ञानमार्गीयत्वाज्ञस्मिन्ननसंभक्तिमार्गीयत्वे शाङ्करो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

षदादित्तिभगवद्भक्तेर्भक्तिहेतुत्वमुच्यते परब्रह्मेन तथाक्षरपतीत्युपक्रम्य भजति सोमतो भवतीति अन्येपि मुक्ती
भवति संसतेरिति एतद्विषयत्वं च स्याज्ज पुरैवोक्तेतिनात्रोच्यते एता चान्यरं से देह्रो यपवेवेद सयाभातं तत्वरत्नीतिव
चनाद्धानदशायामपि पापसत्त्वे वाच्यमन्यथा तरणासंभवापत्तेः एवं सति भक्तिदशायामपि वभेवनन्वेति भवतिसं
शयः तत्र श्रुतावविशेषेणपापनाशश्रवणान्भक्तिपूर्वकाले पापनाशावश्यंभावादेकत्र निर्णीतः शास्त्रार्थोपरत्रापि
तथेति न्यायेन भक्त्या पापनाशादृच्यापितथैव चेति प्राप्ते आह मां प्रपद्यन्ते त्यादि संपरायः परलोकस्तस्मिन्नायस्य येन्त्य
र्थः अपापरःपुरुषोत्तमस्तस्याप्युज्ज्ञानेन तथा च सम्यग्भवन्ते पुरुषोत्तमज्ञानेयेन समसं परायणो भक्तिमार्गइति याचतत्र अथवा
परे पुरुषोत्तमे अयनमयोगामनं प्रवेशइति यावत्तथाच सम्यक्कायेनमतं तथा भक्तिमार्गइति यावत् अथवापरे
पुरुषोत्तमे अयनमयोगमनं प्रवेशइति यावत्तथा च सम्यक्कायेन सततथाभक्तिमार्गइतियावत् ज्ञानमार्गःतस्मा
स्माभक्तिमार्गेपुरुषोत्तमप्राप्त्यात्तत्स्माद्विप्रोष मन्त्रापमित्तमेवं कथनमतो भक्तेः एवमेव पापनाशोपक्रमावः ब्रह्म
भूतस्य भक्तिलाभानंतरं भक्त्या मामभिजानातीति भगवद्वाक्यात्पुरुषोत्तमस्वरूपज्ञानस्य भक्तैकसाध्यत्वात्तथा
एवं सति मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने भक्तोपसृष्यव्यपदे
शात् जन्मांतरसहस्रेषु तपोध्यानसमाधिभिः नाराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते जन्मांतरसहस्रेषु समा
राध्य वृषध्वजं वैष्णवत्वं लभेत्कश्चिन् सर्वपापक्षये सति इत्यादि वाक्यैः पापनाशानंतरमेव भक्तिसंभवाद्युक्तमुक्तं।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भा०
३३

रीत्या भक्तिसाधनानां गमेदेनुरवदंयवाच्यः एवं मतिकृतिसाध्यं साधने ज्ञाने भक्तिरूपं शास्त्राणि बोध्यते ताभ्यां विहिता भक्तिम
क्तिर्मर्यादा तद्रहितानामपि स्वस्वरूपबलेन स्वप्रापकं पुष्टिरुच्यते तथा चापि जीवयस्मिन्मार्गेंगीकृतवांस्तज्जीवेत तत्र प्रवर्त्त
पित्वा तत्फलं ददातीति सर्वं स्वस्थं अतएवम्पुष्टिरुच्यते तथा चापं जीवयस्मिन्मार्गेंगीकृतवांस्तज्जीमार्गेंगीकृतस्तज्ज्ञाना
दिने रूपे त्वं मर्यादायामंगीकृतस्य तटये वित्वं चयुक्तमेवेति भावः अत्र साधकत्वेत विपत्ते बाधकमाह अन्यथा हि विरो
धइति अन्यथा मर्यादापुष्टिभेदेन व्यवस्थाया अकथने विरोधा हेतोस्तयेत्यर्थः विरोधस्तु पूर्वं यत्तग्रंथउपपादितः एते
नैव तन्त्वश्रवणादिरूपा प्रेमरूपा व भक्तेरविशेषेणा पापत्वयएवादेत्सुतकाम्ये हि शेषोस्ति तत्रार्थनिकानामपि प्रेमभक्ताना
न्तःरवदर्शनात् श्रवणादेः पापनाशकत्वश्रवणाद्धाविप्रोघ यत्नस्त्वसंगतः अथ श्रवणादिरूपा प्राये मृत्यपि भवति प्रेमरू
पा तत्वाश एवेति विशेषावाच्यः सापि मेभवतामप्पक्रूरादीनामपि प्रसंगे भगवतासमं कापद्यकृतिश्रवणान्नसाधी।
यानित्यविशेकानिरस्तावेदितव्या तथाहि मर्यादापुष्टिभेदेनांगीकारे बलत्वाएकदायापामगीकृतानां स्वस्वरूपेव श्रवणा
देः प्रवृत्तिस्तदानन्त्वैनैव भगवति प्रेमापि तत्तनिरुधिः कदाचिद्भूत्तस्वभावेन नष्टकोषानि हृजावपितङ्कतेः साधनमार्गी
यत्वाद्नितद्धतीमेगतिमरांचीप्रयुक्तइतिवाक्यादेतेभक्तिरेवभविती अस्मिन्मार्गे श्रवणादिभिः पापनाशये प्रेमोत्पत्तिस्तु।
तो भक्तिः पुष्टिमार्गीगीकृतिस्तजन्यत्वप्रदर्शनात्वानत्रच यापादेरप्रतिबंधकत्वात् श्रवणादिरूपा प्रेमरूपा च पुष्टिगपत्यावा ३३
पर्येणावाते परीत्येन वा भवत्येव अत्र श्रवणादिकमपि फलरूपमेवस्तेहेनैव रूपमाणात्वात्रविधिविषयः नत्वविद्यादिम।

33

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वमप्युच्यते किंच भक्त्या मामभिजानातीत्यत्र ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति भगवतोक्तमिति भक्ति
मार्गेपि पुरुषोत्तमज्ञानेनैव मोक्ष उच्यते ज्ञानमार्गवदत्र ज्ञानेनेति विशेषः तस्मात् भक्तियुक्तस्य योगिनो वै महा
त्मनः तज्ज्ञानेनैवैरापपायः श्रेयो भवेदिति हि तद्वचनेन भक्तिमार्गीयस्य ज्ञानेनैव पुरुषार्थत्वमप्युच्यते तथा चैवं मिथः श्रुत्योः
स्यात्तयोश्च विरोधात्रैकतरनिर्द्धारः संभवति न च तज्ज्ञानेनैव मोक्ष उभयत्राप्यविशेषोक्तेः ज्ञानेनैरपेक्ष्यात् भक्तिस्तु भक्तिस्त्वा
भिप्रायेति वाच्यं विषयभेदेन ज्ञानभेदात् भक्तिसाधनकत्वमज्ञानमित्यनिश्चयात् न च श्रौतत्वाविशेषात्समुच्चय
न इति वाच्यं ज्ञानिनोत्र भक्तस्य पुरुषोत्तमे लयात्समुच्चयासंभवात् तेष्वेवं विरोधाभावादुपपन्नं सर्वमिति चेन्न न पूर्वोक्ता
न मार्गे प्रज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतो लयस्थाननिर्द्धारासंभवात् अपरं तत्तेभ्यास्तत्त्वतो ज्ञात्वेति वचनाद्भ-
क्तिमार्गीनन्तरतो भगवज्ज्ञानमेव प्रवेशसाधनमिति मन्तव्यं तथा च मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः ब्रह्मसं
परमं प्रापुः संगच्छतसहस्रश इति वाक्याज्ज्ञानमार्गीयभक्तिमार्गीयज्ञानरहितानामपि भगवत्प्राप्तिस्तत्साधनत्वं निरूप
कश्रुतिविरोधः तथा च क्वचिज्ज्ञानं भक्तिसाधनत्वेनोच्यते क्वचिद्भक्तिः क्वचित्तदुभयमपीत्येकतरसाधनानिश्चया
त्वाद्भक्तिसाधने संमतेः मह्यं जित्समभवदिति श्रीमद्भागवते रथ्यवत्त्वमित्यादि गतेर्ज्ञानस्य पाष्ठ्यवत्त्वफलजनकत्वं च भयथा
मर्यादामार्गभेदेनेत्यर्थः अत्रायमाशयः एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषतीत्यादि श्रुतिभ्यो
भगवान्सृष्टिपूर्वकाले यपवेन स्वेजीवाय येन तत्कर्म कारयित्वा तत्फल दास्य इति विचारितवानिति तत्तथैव भवति तत्रोक

CC-0, Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ.ए. श्येनैवामुष्यात्मनः कल्पनमेतदुच्यते फलरूपमिति एतदत्र विचार्यते अत्राहुः तितदपि षात्स्वरूपध्यानादेरमतत्त्वे फलमु
३५ च्यते भजनस्वरूपं च यावत्फलं नैराश्येन भगवत्यात्मनः कल्पनमित्युच्यते न च फलनैराश्येन भजने प्रवृत्ते भक्तिरेव भवि
ष्यतीति वाच्यं तेषां यायपोषाम् नैतत्सिद्धं भवति न हि नामत्वावतीति श्रुतेर्भक्तिसाधनत्वात्त्वा भजतः सैव फलं स्वरूपमेव स्वा
त्रपुरुषार्थत्वमनुभवन्तो भजनं तन्मयत्वं तदेव फलमिति प्रतीतिनिर्णयः ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति भगव
द्वाक्याच्च अत एव रहस्यभजनलक्षणं कृतं तथा त्वं त्वत्तत्त्वं भगवत्संबन्धि मित्वमोर विशेषात्कतमो गरीयानिति संशये गूढाभिसं
धिः पठति समयोः सकाशादहस्यभजनकर्त्रैवोपपन्नः उपपत्तिप्रकारः तमेवोद्घाटयति तल्लक्षणाणीयोपलब्धेरिति तल्लक्षणो
34 भगवत्स्वरूपात्मकायोर्थः स्वतंत्रपुरुषार्थरूपस्तद्रूपलब्धेः स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः यद्यपि पुरुषोत्तमप्रवेशेन दान
दानुभवो भवति न च्यापि न प्रभोस्तदधीनत्वं भक्तितिरोभावाद्यमत्र तच्च परीत्य भजनानन्दस्य ततनमादिकं तन्मुक्तिं ददातिक
र्हिचित्स्म न भक्तियोगं दीयमानेन न गृह्णन्ति विना मत्सेवनं जनाः नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थद
र्शिनः इत्यादिवाक्यैरध्यवसीयते अत एव सामीप्यका द्युपसर्गा उक्ताः तेन दासीत्वेन दासत्वेन लीलायामुहूत्वेन प्रभुनिकटे
स्थितिः कृता भवति न च महत्सु मुख्यस्वरूपाज्ञानादल्पएवानन्दयथा सर्वाधिकं मह्यानः पूर्वोक्तं न वाञ्छति तथात्रापीति वाच्यं
दीयमानानामर्थानां स्वरूपाज्ञानासंभवात् अनुभवति प्रत्यक्षप्रमाणत्वस्यैवात्र दीयमानपदार्थत्वात् तदज्ञाने स्वर्गादित्र
येतुल्यदर्शित्वासंभवश्च मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमिति वाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते तस्मात्सूत्रार्थे जिज्ञा ३५

गं तद्रूपभजनानन्दानन्दामृतरूपाभिः कथादिरूपविविधमहानकगाहनानोदहने लोलुपस्यावशहानलम्पनदांत गलितपाप
त्वं संप्रति च यत्कैकामेति वक्ष्याकांत इत्यत्र श्रीभगवते स्वपादमूले भजतः प्रियस्यान्यभावस्य हरिः प्रवेशः विकर्मेय।
दोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्ट इति विकर्म प्राक्तनं तद्दुःखदमिति स्वपचहरित्वेन दुःखदहतैति धुनोतीत्युक्तः।
विशेषणाविशिष्टस्य स्वतो विकर्म कथं संभवात्मा सांगकं मनोभूतं न उत्तमपाल्कतमिति वदा यत्कृतं विकर्मैतत्कथंविद
त्पतितं नामेत्युच्यते त्यक्तान्यभावत्वेन भगवत्सेवायां सर्वेनेद्घ म्नायां पांग्राज्यवन्महद्दागमनाद्यज्ञानेनावकोक्तरूपभजेवि
कर्मीका च ननु विज्ञापनाय चाकेषु विदित्वा कृतवान् तेन तर्कितं विकर्मोऽज्ञामिभूतमितिज्ञायते एतावच्छास्यापि यदि विकर्मभ।
वेनदान चित्तत्पृष्ठेन तेनान्यत्कृतं ये भगवानेव हृदि निविष्टस्तद्धुनोति यत इति कदाचित्स्वभक्तिवलमहत्त्वं सदोषमपि जनेत्क
तार्थीकरिष्यामीत्यंगीकृत्य चाद्यकृत्यदेव तत्हृदिस्थएव तत्समर्गजे दोषमस्पृतं दंगीकारोनं तत्दोषमपि धुनोतीति सर्वपदे
नोच्यते चिरकालभोग्यमपि तत्त्वाणेनैव नाशयतीति ज्ञापनेकालादेरपि निर्वधकत्वमित्यपि ज्ञापयितं परस्यकालादेरी।
शात्वमुक्तं भवत्र भक्तजनादिदृष्टान्तेचेशतातोस्य एष एव विकर्मणि सोपि संभव इति उपपन्नस्तल्लक्षणोपिलक्षैलोकवत्।
नत्वमत्तोरेव सर्वत्र फलत्वमुच्यते युक्तं चैतन्त संसृते दुःखात्मकत्वात् तन्निहृतेः सर्वेषामिष्टत्वात् प्रष्टिमार्गीय भक्तानां तु
तदनपेक्षित्वमुच्यते तदुक्तमथर्वोपनिषत्सु श्रुतदेवाणामंत्रस्त्ररूपमुक्तापघृत परवस्तुन यथायारयतीत्यादं रतेसाम
तो भवतीत्यादिपतदपेक्षितमूपे किं रसनं कथं हेतदृतनमित्यादिप्रश्नेनंतरं पद्यते भक्तिरस्य हृष्टे भजनेनंतदिहाम्नत्रोपाधिनेरा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ॰भा॰ वपि फलसाधकत्वमनुसमुदितानामेव तेषामिति चेन्न मे यो ऽर्थो यत्प्रमाणैकसमधिगम्यः स तेन प्रमाणेनैव सिध्यति तथा
३५ ऽत एव देवतादेस्तथात्वमप्यस्तेव गम्यत इति नन्वत्र तथात्वप्रकृते तु तेषां तथात्वमलौकिकप्रमाणैकसमधिगम्यं श्रुतिसूत्रै
व न चोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यम् अलौकिकेऽर्थे लौकिकस्यासामर्थ्यात् अन्यथा ब्रह्म
णामनसैव प्रजाजनने निषेकादिकमपि कल्प्येत स्मृतिरपि केवलेन हि भावेन गोप्यो गावः खगा मृगाः ये चान्ये मूढ
धियो नागाः सिद्धा मामीयुरञ्जसा एताभ्यामाद्ययोरिकारस्याप्यनाप्यनुशयोऽस्तीति भाति गाभ्यामित्यपकर्षणेना
रायणस्मृतिरित्यादिरूपैवमेवाह इममेवार्थं हृदि कृत्वाह सूत्रकारः शब्दानुमानाभ्यामिति श्रुतिस्मृतिभ्यामित्यर्थः
35 न चोक्तरूपेणैतेन सूत्रकारस्याप्यनाप्यनुशयोऽस्तीति भाति यत्रोक्तसाधनलोपसंपत्तिरेकस्मिन्भक्तेऽस्ति तत्प्रत्येकेनैव मु
क्तावितरसाधनत्ववाधकश्रुतिविरोधाच्छ्रवणकीर्तनस्मरणानामनुत्यन्यविहितपूर्वत्वापारणादिपिसंभवादन्यथा
सिद्धिसंभवे विनिगमकाभावादेकैकोऽपि न भक्तिरिति न नियमोऽतः प्रत्येकसाधकत्वं चाधिकानां सर्वासां श्रुतीनां मिथो
विरोधः तर्ह्येकत्र तथात्वं सर्वत्रैव तथास्त्वित्याशंक्य तत्र बाधकमाह शब्दाभ्यामनुमानाभ्यामिति प्रवृत्तवत् न त्वप्रत्ये
कमपि मुक्तिहेतुत्वमनुच्यत इति न तथेत्यर्थः यत्र प्रत्येकमपि तथात्वं तत्र किमुत व्यक्तव्यसमुदितानां तथात्व इति भा
वः तेन श्लिष्टः प्रयोगोऽयमिति ज्ञेयं यावदधिकारमवस्थितिराधिकारिकाणामेवं मुमुक्षुभिर्भक्तिसाधनत्वेन क्रिय ३५
माणानां भगवद्धर्माणां मुक्तिसाधनप्रकारो विचारितः अथ मुक्तानां भगवान्स्वविचारितकार्यं लौकिकेऽप्ययोग्यकां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तोः सकाशान्न पूर्णार्थवान्स्यादिति निरुक्तमेवास्योपपद्येतेत्यं इममेवार्थं दृष्टान्तेनाह लोकवदिति यथा स्वाधीनभ
र्तृकानामपि कान्तद्वयस्याननुमार्गमाह विज्ञादिकं दीन्यमानमपि नोरीकरोति तथेत्यर्थः अथवा स भगवानेव लक्ष्मा
णमसाधारणो धर्मोपसमस्तलक्षणाद्भुतभक्तिभावः स एवार्थः स्वतंत्रपुरुषार्थरूपस्तत्र पूर्ववत्तमगत्याकथ
वानेव हि भक्ता भक्तत्वेन ज्ञाप्यत इति तथा एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति एवं सति पद्मायकं परमकाष्ठापन्नवस्तु
पुरुषोत्तमस्वरूपमेकलत्ररूपतन्महत्वं कथं वक्तुं शक्यमिति सूच्यते अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां
अथर्वणोपनिषत्सु पठ्यते परब्रह्मैव यो धारयति रमति भजति ध्यायति प्रेम्णा शृणोति श्रावयत्युपदिशत्याचरति सोऽश्नो
भवतीति तत्र धारणादीनां समुदितानामेवामृतत्वसाधकत्वमुत प्रत्येकमपीति भवति संशयः अत्र धारणादिसाधन
कलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वमुपलक्षणं चैतन्न श्रवणादिनवविधभक्तीनामप्येवं
तथात्वमिति पूर्वपक्षे सिद्धान्तमाह अनियम इति समुदितानामेव तेषां फलसाधकत्वमिति नियमो नास्तीत्यर्थः अ
त्रोपपत्तिमाह सर्वासामविरोध इति विनापेक्षेन साकल्यं मुक्तो भवति संसृतेरिति श्रुत्या चिन्तनमात्रस्य तथात्वमु
च्यते पञ्चपदीं जपन्नित्या कृष्णात्मको ब्रह्मसम्पद्यते ब्रह्मसम्पद्यत इति श्रुत्या कीर्तनमात्रस्य तथात्वमुच्यते तथा च प्रत्येकपक्ष
एव सर्वासां श्रुतीनामविरोधः स्यात् एवं सति परब्रह्मैव यो धारयतीत्यादिषु सोऽमृतो भवतीति पदं प्रत्येकं सम्बध्यत इ
ति ज्ञेयं ननु यथा दण्डादीनां प्रत्येकं घटहेतुत्वेऽपि ज्ञावपिनेकस्येव न ज्ञानकत्वमेव मत्राप्येकैकस्य चिंतनादेस्तथात्वीक्ता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग.ए. पिसंभगवाज्ज्ञानेनैव मुक्तिरिति पूर्वपक्षे ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन् पुरुषोत्तमप्राप्तेरेव मुक्तिपदवा
च्यत्वात्तद्भजनस्यैव तत्साधकत्वमिति दृढीकुर्वन्नाह अन्तरं धियामित्यादि तत्र प्राहुः पूर्वपक्षनिगमे वाजसनेयके श्रूय
३६ ते एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमित्यादि तथाथर्वणे च अथ परा यया तदक्षरमधिगम्यत इति तेन ज्ञाने
मार्गे अक्षरविषयकान्येव ज्ञानानि निरूप्यन्ते पुरुषोत्तमविषयकाणि नेतीनिति श्रीयते ब्रह्मविदाप्नोति परमिति श्रुतावक्ष
रब्रह्मविदोऽक्षरात्परस्य प्राप्तिरुच्यते अक्षरादपि चोत्तम इति भगवद्वाक्यादक्षरातीतः पुरुषोत्तमः भक्त्या मामभिजानी
तीति वाक्ये मामिति पदात्पुरुषोत्तमविषयं ज्ञानमुच्यते तेन तत्त्वक्षरविषयके किंच ब्रह्मभूतस्य भक्तिलाभोक्तेः तस्य
३८ चानेकांशाविर्भावात्मकत्वात्तस्य च विद्यानाशतन्यत्वात्तस्य चाक्षरज्ञानजन्यत्वात्पूर्वकक्षाविश्रान्तमेवाक्षरज्ञानप
एवमप्यक्षरविषयिणीनां विद्याश्रुतौ मुक्तिसाधनत्वेष्वपावरोधः प्रवेशनेनानेनेति यावत्स्वसामान्यतज्ज्ञावाभ्यो हेतुभ्यो
मा पुरुषोत्तमस्य सर्वथैव मुक्तिरिति सांख्यमर्यादामार्गांगीकृतानां ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः
सर्वेषु भूतेषु मद्भक्तिं लभते परामिति वाक्याद्ब्रह्मभावानन्तरमेव भगवद्भावे च संभवति तेन पुरुषोत्तमे प्रवेशात्तत्र परं
परो यथा योगो ब्रह्मभावस्यैव भाभ्यो हेतुभ्यां तथा यथ वस्तुतस्तु पुरुषोत्तमप्राप्तिरेव मुक्तिरिति भावः ननु अक्षरस्यावि
शिष्टत्वेन तदुपासकानामपि तथात्वात्केषांचित्तत्रैव लयः केषांचिद्भक्तिलाभ इति कथमुपपद्यत इत्याशंक्य तत्र हे ३६
तुदृष्टान्तेनाह अग्नेः पयसेदवदिति उपसदाख्यकर्माणि नानाप्रस्पर्शाख्यमोपसदं कर्मास्ति तत्राति यथा आधौ वास्तवि

ज्ञात्वा स्वैश्वर्यादिकं दत्त्वा पुनर्जीवेन तत्कार इति स जीवस्तेहं स्वैरं मुक्तो भवति न वेति विचार्यते तत्र जीवकृतं भग-
वद्विषयकधर्माणां यत्र तत्साधकत्वं तत्र भगवदीयानां धर्माणां तत्साधकत्वं सत्तामेव तेषां स्वकृतत्साध्यत्वेनावि-
धेयत्वात्तत्साधनेषु प्रवेशापीतिं स टेहे निर्णयमाह यावदित्यादि यस्मिन्जीवे यत्कार्यसाधनार्थमधिकारो भगव-
ता दत्तस्तत्कार्यसाधनस्य मास्तस्मिन्स्वे स्वधर्मं भगवता स्थापिता स्मिन्नाधिकारिका इत्युच्यंते तत्कार्यसंपत्तिरेव तत्-
दधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् स्थितिरित्यर्थः पंचमसि तत्संपन्नो मोपि निवर्तत इति तत्स्वपिनो धर्मा-
अपि निवर्तन्त इति मुक्तिपर्यंतं न तेषां व्यापारसंभवो भगवता तथैव विचारितत्वान्मुक्तिस्तु भक्त्यैवेति भावः यच्च ब्रा-
स्तनास इत्ते सर्वे संप्राप्स्यंतीति सचरे परस्यान्ते कृतात्मानः प्रविशंति परं पदमिति वाक्यं तत्त्वाकल्पान्ते तेषामधिकारः
समर्पि प्रभृतीनां तद्विषयकमिति ज्ञेयमन्यथा भगवद्दत्ताधिकारसाधनार्थं स्वभरतस्य स्वाधिकारसमाप्तौ मुक्तिर्नव-
देत कृतात्मान इति पदात्तेषामपि भगति चकृतातः करणानामेव परस्य भगवतः परं पदं व्यापि वैकुंठप्रवेशा उक्ता
तेन तत्वाधिकारिकगणोः अन्तराधियांत्ववरोधः सामान्यतज्ञानाभ्यामेयमर्द वत्तउक्तं तत्काणर्वाणपनिषद्धा
कौ भगवद्धर्माणां मुक्तिसाधनत्वमुच्यते श्रुत्यंतरेषु तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनाय ज्ञानादे-
वतुकैवल्यं तरति शोकमात्मवित् ब्रह्मवेद ब्रह्मैव भवतीत्यादिषु ज्ञानस्यैव मुमुक्षासाधनत्वमुच्यते श्रुतित्वाविशेषादुभयो-
स्तथात्वे कारणं वेजाते कार्ये वेजात्यस्याशयापावृष्णक्तव्यान्मुक्तो वतदस्मभवाद्भक्त्या मामभिजानातीति वाक्याद्भक्तो ज्ञानस्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ.ए. मार्गीयाणां न पुरुषोत्तमप्राप्तिरिति सिद्धं यं प्राप्तः स्थानीत्यनेन परस्य लक्षणमुक्तं तच्च मत्स्यादिप्रसंगे श्रीगोकुलेश
रेरस्पष्टमुच्यते तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वं तद्विषयकस्य वर्णनादेरभावादिति मतः अव्यक्तोऽक्षर इत्यु
३७ क्तस्तमाहुः परमां गतिमिति वाक्यात्स्यापि परमां गतिमित्यत्राक्षरमेव यातीत्यर्थो ज्ञेयः किंच तैत्तिरीयोपनिषत्स्वप
ठ्यते यस्मिन्निदं सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन येः
नावृते खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च यमंतः समुद्रे कवयो वयंति यदक्षरे परमे प्रजा इति ।
37 अत्राक्षरात्मकत्वेनाक्षरात्मकादाकाशात्परमे व्योम्नि भक्तानां हृदयाकाश इति पाचतं तत्र प्रकाशमानमित्यर्थात् अ
त एव ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्नित्युपनिषत्स्वेव च ।
पठ्यते यदक्षरे परमे प्रजा इति पदमव यंतीत्यनेनैसैवुच्यते अत्र प्रजापदाधापि वैकुंठात्मको लोकोऽक्षरपदेनोच्य
त इत्यवगम्यते अत एव न यत्र माया इत्यादिना श्रीभागवतेऽस्वरूपमुच्यते एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चीय
ते उभयोर्व्यक्तातीतः पुरुषोत्तम इत्यवगम्यते एवं सति सामान्यभगवद्विभूतिरूपत्वे तद्भावस्तस्य पुरुषोत्तमस्य भा
वः सञ्जोक्तौ त्यानत्रास्थितिरिति पाचतां भ्रांतिहेतुभ्रांत इत्यर्थो ज्ञेयः उपदामननात् ननु संसारनिवृत्त्यानंदावि
र्भावयोरविशेषादक्षरब्रह्मणि पुरुषोत्तमप्रवेशान्न नतोऽक्तो को हेतुरित्याकांक्षायामाह उपदिति परिमाण ३७
वचनतस्य श्रुतौकथनादित्यर्थः अत्रेदं ज्ञेयं तैत्तिरीयोपनिषत्स्वेषानैदस्य मीमांसा भवतीत्युपक्रम्य मानुष ।
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

च मे सेवायदाज्यं चन्द्ररवेत्त म्वात्मसम्भवयतितत्वानन्न प्रमित्युच्यते अथवा एष्ठमसीति मन्त्रेणाथोडशा सप्तविंजो यज्ञ।
मानेन सहतानन्न — समभवम शीत्यन्न मेदी त्वामिति मन्त्रेण यजमानस्तत्समनवमश्नात्यग्नत्विजे कामयेनाथ यज्ञपश्च
समस्के दितिन प्रथममभवमशायेदितिश्रुतेः श्रुतौ कल्पे च अत्र सर्वे ष्वाम त्विज्ञातानन्न स्विन्त्वा विशेषेपियस्मिन्नेतिश
येनेत्तपेक्षात्तत्रैवत ष्वा कृतिर्नेनरधुनहितत्रा विशिष्टधुक एषमेवकृतिरितिपर्यरुयोगः संभवत्येवमिदमपीत्यर्थः
नन्वन्प्रवणाद्यर्थं श्रापुरुषोत्तम सर्वेषि त्वेनतत्वाश्रित्वहे तत्वमेवमत्तरस्यापि क्षित्यापांकात्वति विलासरजीवतमः
धुजनिरासकेनयडंचशोदयावलचूडामणिनेवतिरस्कृतिनस्वेतावत्तमसुदितेत्याशयेनाहतदुक्तमिति भगवन्नी।
ताविति शेषः तत्र यदक्षरं वेदविदो वदन्तीत्युपक्रम्य स याति परमां गतिमित्यनेनाक्षरप्राप्युपायं वैलक्षण्येचोक्ताभ
क्तैकलभ्यत्वेनस्वस्य वक्ष्यमाणपूर्ववदक्षरयोः स्वरूपमाहुः स्वस्य पुरुषपर्यन्तमित्युपक्रम्य प्रभवन्त्यहरागमे इत्यतेनाक्षरस्वरू
पमुक्त्वा परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः इत्युपक्रम्य तद्धाम परमं ममेत्यनेनाक्षरस्वरूपमुक्तं अत्र पूर्वेतरस्वरूपमुक्तमिति पर
स्तस्मात्त्वित्यत्रत्वा देवपरत्वमुच्यते तेनक्षरस्य एवं परामर्शित्वात्तस्यैव पूर्वमुक्तत्वादतएवात्र व्याख्यावतं कस्तशब्द
उक्तः एतेननित्यत्वेनतत्तरणाभावादक्षरशब्देतज्जीवएवोच्यतेन तत्पुरुषोत्तमाधिष्ठानभूतो जीवानां इति निरस्तं
येप्रपन्न तिवर्तन्ते इति वाक्याज्जीवेनतथात्वासंभवात् नित्यमुक्तत्वापत्त्या शास्त्रवैफल्यापत्तेश्च इतनएवज्ञानमार्गि।
णां नत्वानि रेवमुक्ति रितिज्ञेयं तन्नो निवृत्तेः पुरुषः स परः पार्थेत्यनेनाक्षरात्परस्य स्वस्य भक्त्यैकलभ्यत्वमुक्तं तेन ज्ञान

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ०गी०

३८

फलकत्वात्मकत्वेनज्ञानाभावेनतद्भेदोपदेशानुपपत्तिः स्यादितितन्मतत्यागमेवेवमतिभक्तिमार्गोज्ञानमार्गस्योत्कर्ष
प्रसिध्यतीत्याशंकापरिहरति उपदेशांतरवदिति नन्वात्मभेदज्ञानायोपदेशः किंतुयथाग्निमस्त्वर्गापवर्गाख्यापार
लौकिकानंदफलकालौकिकेकर्मण्यधिकारनूपसंस्कारार्थंगायत्र्युपदेशः किंयतेतत्संस्कारसंस्कृतेनतच्छरीरादि।
कर्मापिभूतादिभिरपिनोपहतंभवतियथावायोगोपदेशसंस्कृतस्यचतुरस्यादिजीवप्रदत्तंतेनतयाप्रकृतेभक्तिभाव
स्वरसात्मकत्वेनसंयोगविप्रयोगभावात्मकत्वाद्धितीयस्यप्रलयानलादतिकरालत्वेनकदाचित्तद्भावेदयेनेनभक्तवपु
रादयोस्तिरोधानेग्निमभजनानंदात्मभवप्रतिबंधः स्यादितितन्निवृत्त्यर्थंज्ञानोपदेशसंस्कारसंस्कृततद्वपुरादिकंभग
वताक्रियतेनत्वात्माभेदज्ञानेभगवतोभिप्रेतमित्यर्थः अन्यथोपदेशानंतरंवदरीगच्छविद्वरप्रतीहागतोहंविद्वात
रात्मेतिनवदेदेवमेवान्यथापिभक्तेषुज्ञेयं अत्रोपदेशांतरपदंप्रस्तुतोपदेशभिन्नपपरोपदेशमाहेतिप्रस्तुतस्यातस्यान्य
स्याभावात्भेदपदेनभिदोपदेशएवोच्यते एतेनभगवान्जीवानांभक्तिभावप्रतिबंधनिरासेपिचसर्वंकरोतीतिज्ञा
पितेभवति अथवोपदेशांतरवदित्यस्यायमर्थः शरीरादयध्यासवतस्तद्भिन्नआत्मातत्त्वेननुशरीरादिरित्युपदेशो
ज्ञानमार्गेतथाक्रियतेतेनशरीरादावात्मबुद्ध्यायसेहादिः सोपगच्छतितथात्रसर्वेषामात्मनोह्यात्मायआत्मनि।
तिष्ठन्नित्यादिश्रुतिसिद्धोजीवात्मनोप्यात्मापुरुषोत्तमइतिबोध्यतेतेनवपुरुषोत्तमेतिरूपधिस्नेहस्तत्संबंधित्वेनात्मनि ३८
सन्निध्यतियथ्येचभावः एवंमय्यासीदेवतथापिसहजस्यशास्त्वेनज्ञानेतिप्रदीर्घाच्चभवतीतितथानेताचज्ञानीवा।

38

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मानंदमेऽक्षरगणपित्वात्तस्मादक्षरोत्तरं प्राप्तगणमानंदं गंधर्वानारभ्य प्रजापतिपर्यंतस्योत्कीर्त्यंते तेषेप्रातप्रजाप
तेरानंदात्मणकोब्रह्मणस्यानंद इति एवं सतीयत एतावदिनतरानंदस्य स्वदिकचित्तश्रुतौकथनादानंदमयत्वेन
निरवध्यानंदात्मकत्वस्य पुरुषोत्तमेकथनात्तथोक्तिरिति अतएवभूतग्राममुक्त्वात्मनः अपज्ञानमार्गेयथास्वात्म
त्वेन ब्रह्मणो ज्ञानं तथा भक्तिमार्गेपि भजता पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञाने भवतिनवेति विचार्यते सर्वा॰
त्मत्वेन ब्रह्मणो कथनात्र एवनीतिपूर्वः पक्षः नेत्यात्वं विमर्व स्यवशी सर्वेस्य प्राप्त उत्पादि श्रुतिरेवमे वज्ञाननतत्वप्ये॰
तिसिद्धांतः अत्रतथाज्ञानाभावस्यावष्टणकृत्वायथेविपरीतेचाघकमाह पूर्वस्मिन्सूत्रे ब्रह्मानंदाङ्गजनानंदस्याधि॰
४ कोनिरूपितेसत्त भगवदत्तस्तदावदापकोऽस्य प्रभुणानसंपाद्यते स्वात्मत्वेनज्ञानेचभजनानंदोतराय रूपं प्रपद्यतस्से
पादयेत्तत दृष्टादृष्टेद्वत्पथाभावज्ञाः स्वात्मत्वेनज्ञानेभक्तिमार्गीयस्यानसंभवतीत्याशयेनाह अतएवस्वात्मनउत्तिम
गवतमार्गेस्थापत्येनोगीकृतो यथात्मा जीवस्तस्य पदात्मत्वेन ज्ञानं तदङ्गजनानंदाननुभवेअतएवावपानरूपमिति॰
भगवतातादृशो जीवे तत्र मपाद्यत उत्पर्थः तत्सपदनस्य सर्वथैवासंभवितत्वहीनत्वंवस्तापपितेदृष्टांतमाह भूत
ग्रामवदिति उक्तमक्तस्यविग्रहोपलौकिकउतितत्रलौकिकोभूतग्रामानसंभवतिहीनत्वात्तथेत्यर्थः अथवा॰
लौकिकोभूतग्रामः स्त्रीपुत्रपश्वादिनंब्रह्मानंदानुभवे बाधकस्तथा भजनानंदानुभवे स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः
अन्यथाभेदाचपपत्तिरितिचेचोपदेशातस्वतः नन्वमक्रेकेष एतद्वादिप्रज्ञानोपदेशाः श्रूयते सचात्मब्रह्माभेदज्ञान

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ.ग्रा: नएवभवंतीतिनविधिमपेक्षंतइत्यर्थः कामादीनद्व्रजन्नचापतनादिभ्यः पूर्वसूत्रेशास्त्रोक्तत्विलसाधनरूपत्वेभ
क्तेरुक्तेनतदाद्यार्थमधुनामुक्तिप्रतिबंधकत्वेनोक्तानांकामादीनामपिभगवत्संबंधान्मुक्तिसाधकत्वमुच्यतेभक्ति
३५ स्तुविहिताविहिताचेतिद्विविधामाहात्म्यज्ञानयुतेश्वरतेनप्रभौनिरुपाधिःस्नेहात्मिकाविहितान्यतामामत्वात्
कामाद्युपाधिजस्नेहरूपापोकामायेवमुक्तिसाधनमित्यर्थः भगवतिचित्तप्रवेशहेतुत्वात् आदिपदात्सुचत्वसंबं
धित्वादयः स्नेहत्वाभावेशविहितत्वभगवद्विषयकत्वयोरविशेषाद्द्वेषादिरपिसंगृह्यते तेनभगवत्संबंधमात्रं
स्पमोक्षसाधकत्वमुक्तंभवति तत्रविहितभक्तावित्यर्थः शास्त्रेसर्वतोरूपत्वेनोक्तादिग्रहाः सर्वेनिवेदनपूर्वक
39 गृहेषुभगवत्सेवांकुर्वंतोतदुपयोगित्वेनतेभ्यएवमुक्तिर्भवतीत्यर्थः एतादृशानांगृहाणांभगवद्रूपत्वेतिज्ञापना
यायतनपदं तेषुतथाप्रयोगप्राचुर्यात् आदिपदेनस्त्रीपुत्रपश्वादयः संगृह्यंते एतेनज्ञानादिमार्गोद्भवत्वेषुउक्तो
भवतिबाधकानामपिसाधकत्वात् माहात्म्यज्ञानपूर्वकस्नेहसत्त्वेवभगवत्त्वेनज्ञानेकामोपिसिद्धोभवतीतिज्ञापनायच
कारः आदरादलोपः ननुनित्यानांवर्णाश्रमधर्माणांचैककालेप्राप्तौयुगपदुभयोः करणासंभवाधन्यतरस्याधे
प्राप्तेकस्यत्यागःकस्यनित्यात्वेशयः तत्रकर्मणांस्वस्वकालेविहिताभकरणेप्रत्यवायश्रवणाद्भितरत्रानघाश्रवणा
दन्यदापिततत्कृतिसंभवात्सावकाशत्वेनतेषामेवबाधोयुक्तोनतुनिरवकाशानामितिपूर्वपक्षस्तत्रसिद्धांतमाह ३५
आदरादिति ब्रह्मयज्ञप्रकरणेतैत्तिरीयैःपठ्यते ओमितिप्रतिपद्यतएतद्वैयज्ञस्वाध्यायीविद्याप्रजेपावागेतत्परममक्ष

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भेदस्याभाति अथैतावता संपत्तिरेवोपदेष्टा कार्येन तु तेन पूर्वं भावोपमर्दः संभवतीति मा भूत् तेन ज्ञाने सर्वाधिकं मन्वापन्न
त्केवलप्रदर्शनेन च सिध्यति अतिहारोविशिंषेतिहीनत्वात् ननु तयोर्हसौ सौपोसो से हमित्यन्तरेयकै ते तिरीयकेचा
हमस्मिब्रह्माहमस्मीति पद्यते अत्र समध्यस्थब्रह्मपदममयत्र सेवध्यते तेना हन्त्यत्यतिहरितो ब्रह्माभेदः सिध्यति
नत्याली लामध्ययाति भक्तानामपि कृष्णोऽहमहं कृष्ण इति भावउल्लेखस्य श्रूयते तेन तस्य तद्भेदज्ञानं भक्तिफलमिति
पंफुल्यमानमतिवादिनेतन्स्वपंबोधयति रसात्मकत्वाङ्गकैः संयोगविप्रयोगात्मकत्वाद्द्वितीयभावोऽङ्गे कथमेत्र
शुमलादयोव्यभिचारभावास्तथाति विगाटमावेन तदभेदस्फूर्तिरप्येकः सनत्तु सावेधिकस्तदास्वात्मानं तत्त्वेन वि
शिंषतिते च स्वात्मत्वेन सोत्रव्यतिहृभपदार्थ इत्यर्थः अपरं च उद्देश्यविधेयभावस्फूर्तौ न स्वं ई तन्ज्ञानमस्ति किं तु
भावनामाचे भक्तानां तु विरहभावेन तदात्मकत्वमेवाविर्भूय स्फुरति येन तत्लीलास्वतः कुर्वन्ति न घयान्तथाश्रीभागव
दशमस्कन्धविहृतो मयेचेतनमस्माभिः एवं मति स्वं त्वं पदैर्हि तज्ज्ञाने तद्भक्तिभावैकदेशव्यभिचारिभावेष्वेकतरइतिस
र्वपसर्वाणांचलयोरिचज्ञानभक्तोः स्वारस्यकथं वर्णनीयमिति भावात्सेवादिसत्यादयः अथेदं विचार्यते प्राप्तभक्तेः
पुरुषस्य तु सैन्यशमदमादयो विधीयते न चेति फलोपकार्यं न रंगसाधनत्वात् कृष्णोत्सत्यादिवविनेभगवत्याउभीव
संभवाद्विधीयत इति पूर्वः पक्षः तादृशस्यतेन विधीयत इति सिद्धान्तः तत्र हेतुमाद्दृशिपस्ताद्धेतोः सेव भक्तिरेवसत्या
दिसर्वसाधभनूपानस्यास्तस्यात्दृष्टयेपि ज्ञानमार्गे विहितत्वात्कष्टेन क्रियते ममस्तु भिस्तभक्तहृदि भगवत्याउभीवात्स्व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ.गी. त्करणेऽनुपस्थितेपि यदि पूर्वं भगवद्धर्मकरणमुच्यते तदा त्वदुक्तं स्यान्न त्वेवं किंतु भयोद्वेगपत्क्वाणाद्युपस्थिते बलाब
५० लविचारे क्रियमाणेऽस्मदाद्युक्तमतो वचनं भगवद्धर्माणां बलवत्त्वेनालोपवचनाच्च कर्मागत्त भवेत्तेषामसिध्यतीत्यर्थः।
तन्निर्द्धारणनियमस्तद्दृष्टेः पृथग्व्यप्रतिबंधः फलं अथेदं विचार्यते मुमुक्षोर्जनस्य विदः कर्मकर्तव्यं न चेति तत्र मार्ग
त्रयफलात्मकेन सिन्नेपक्षे पुनस्तस्य स्वतोऽपुरुषार्थस्य करणमप्रयोजकमिति न कर्त्तव्यमेवेति पूर्वपक्षस्तत्र सिद्धां।
तमाह तन्निर्द्धारणेत्यादिना अथेदमाहृत भक्तिमार्गादि मर्यादापुष्टिभेदेनास्ति हि द्विविधं तत्र मर्यादायां पुष्टौ चैतादृश
स्य न कर्मकरणे भवति अत एवैतन्निरीयको पि न षण्ढ उपद्यते आनंदं ब्रह्मणो विद्वान् बिभेत्य कुतश्चने एतं ह।
90 वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति श्रूयते चोभयविधानामपि कर्मकरणमपरीषीद्व
पांडवादीनां एवं सत्युभयविधानां मध्ये मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्द्धारयति स करोति परा तद्विपरीतं सन्।
करोति यथाशुकजडादिः एतन्निर्द्धारस्य भगवदधीनत्वात्तौ भक्तेष्वपि तन्निर्द्धारणानियमोऽतः कर्मकर्तव्यमेवा तन्निर्द्धा
रणात्वाधुनिकानां एवं सता ज्ञाज्ञातवतानां तत्संदेहवता च कर्मकर्त्तव्यमिति सिद्धं तत्रोभयोः फलं वदंत्यादावाधस्याह
तदृष्टेः तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा तत्र चाप्यनाविहतं कर्मफलात्पृथग्भिन्नमीश्वरकृतकर्मणो पत्फले वे
दमर्यादारक्षा लोकसंग्रहश्च तत्फलमित्यर्थः हिशब्देन सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत कुर्याद्विद्वांस्तथाऽ ५०
सक्तश्चिकीर्षुर्लोकसंग्रहमिति भगवद्वाक्यं रूपोपपत्तिः सूचिता द्वितीयस्य मध्यमाधिकारात्कलसंगादि जनितचित्त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रेतद् चाप्युक्तम् ऋचोऽक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे
समासत इति अत्र वक्तव्ये अथितेन वर्णात्मके वस्तुतस्तु परमव्योमात्मकेऽक्षरे ब्रह्मण्योंकारे वर्णे मां न तज्ज्ञा केवलम्
किमृचा करिष्यतीत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्वमुच्यते एवमेतिजडकर्मणोपि तथात्वमायातीति एते
न भक्त्या मामभिजानातीति वाक्यात् परब्रह्मस्वरूपज्ञाने भक्तेश्चेति भक्ताः स्मृताः पुरुषोत्तमविदो ये तेषामेव वेदाध्यय
नादिकं फलप्रदं नान्येषामित्युक्तं भवति अत एव श्रीभागवते प्युक्तं मुखयोपि देवगुप्तात्मसेगा विप्रा वाउद्गमे चरंति
तेन सेमेरतीति चान्वये निदर्शने येऽत ऊर्ध्वं रतेनत्वीक्तं परब्रह्मत्वेऽडस्त इमे भक्ताः सचापेत्तयामम्य कूकारेण भग
वन्निकटे श्रीगोकुले वैकुंठादिष्वासत इति तेनान्येषामप्यगमत्वमर्थादितिप्र भवति पुरःस्थितानांघवाचीदम प्राद्प्रयो
गेण चान्येषामसत्त्वल्पत्वे श्रुतेरभिमतमिति ज्ञापते अवक्षा वोपामपि न मन्मेतारः पूर्वे पत्ता विदज्ञतस्पगर्भेजनेषा
पिपर्तीन आस्यजाननीनाविहि विज्ञानमहस्ते विष्णोस्तुमतिं भजामहे इत्याह तस्मिन्नेवार्थे धर्मेभ्यः सकाशात् भगवद्धर्मे
ष्वादरः श्रूयत इति तेषामलोपमूवेत्यर्थः एतेनाकरणे प्रत्यवायश्रवणादित्यादि यदुक्तं तदपि प्रत्युक्तं वेदितव्यं कर
णेपि चैयर्थ्यात् तदपरिहारात् एवमपि पदकरणे प्रत्यवायकथनं तेन तस्मात् अवकाशं प्राप्य गोणकालेप्यकरणे न थेति
न स्यापाय इति ज्ञापते नन्वेवं नात्यावश्यकत्वे श्रुतेन्नपतपन्नाद्विवन्क्षमें पपोगित्वभक्तितज्ज्ञानयोः स्यादिति कर्मण एवप्रा
धान्येन नभक्तेः सिध्यतीत्याशंक्य भक्तितज्ज्ञानावश्यकत्वप्रबोधकश्रुतितात्पर्यमाह उपस्थितेत लद्वचनात् नयोर्ग्रुगप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ.सू.
४१

नेप्रदानवरदानमितियावत्तद्धेतुत्वमित्यर्थः वैरेणापि लकृत्यसाध्यमपि साध्यतीति तथा शत्रुसंहारभयादिनापि शरणापि
र्भवति तत्र न तस्याः प्रकृष्टार्थत्वं किं तु तत्रैव वृत्तेरेव अकृतेपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेनात्यर्थं स्वरूपा
तिरिक्तासकृत्प्रार्थनासद्भावस्वाभाव्येन शरणागमनाधिसाधनेषु कृतेषु यथा मोक्षाप्राप्तिं ज्ञात्वा प्रभुमेव शरणं गच्छेयं तच्च न स
कृतिसाध्यमिति — एतदुक्तं प्रदानवदिति भक्तस्य स्थितौ यथा तिरोभवति सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमसत्त्वेने
न स्थितत्वासंभवेपि स्वत एव कृपया दास्यामीति विदित्वोक्तं अथवा सर्वात्मभावेन मोपासीतीति संबंधः यद्वा प्रदानवदित्यस्य पूर्व
41 वदेव व्याकृतिः तत्र साधनासाध्यत्वे प्रमाणमाह तदुक्तमिति नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवै
ष वृणुते तेन लभ्य इति श्रुत्या वरणातिरिक्तसाधनासाध्यत्वमुच्यत इति न तदर्थत्वेनेत्यर्थः भगवदुक्तत्वात्तोभयपदस्यानस
जिरर्थः किं तु यतो वाच इत्यादिनानंदस्य स्वरूपमुक्त्वानंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुतस्तदुक्तप्रत्यवाकरणात्म
कपुरुषोत्तमभजनानंदानुभवोत्तरकालीनमकुतोभयं तदर्थः लिंगभूयस्त्वात्तद्बलीयस्तदपि न त्वप्रतिबंधककीलाह
ष्ठादिसद्भावेपि चरणाकार्यस्याननतत्रिवृत्ता वतिसंप्राप्ये प्रतिबंधकाभावस्य सर्वत्र हेतुत्वात्तन्निवृत्तावेव तद्येति पूर्वप
क्षे सिद्धान्तमाह लिंगेत्यादिना सोमोपनिषत्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव ह्याब्रह्मविद्योप
देशार्हत्वं भवतीति ज्ञात्वा सनत्कुमारेण नारदाधिकारं च ज्ञातुं यद्वेत्थ तेन मोपसीद इत्युक्तो नारदः स्वयं विदितमृग्वेदः स्व
यं विदितमृग्वेदादि सर्पदेवजनविद्यांतमुक्त्वा सोहं भगवतो मंत्रविदेवास्मीति स्वाधिकारमुक्त्वाहं नात्मकिञ्चनं ध्येय च ४१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मालिन्येन भगवत्संनिधेः प्रतिबंधः स्यात्तन्निर्हृतिस्तु मत्कृतकर्मणः फलमित्यर्थः अथवा पूर्वसूत्राभ्यां भगवद्धर्मकृते
एव प्रपकत्वमुक्तं सर्वात्मभाववतो ज्ञानेन च वैराग्यप्रायः श्रेयो भवेदिति हृत्यमत्र चनाद्वियेयाभावात् संभवाच्च कर्म।
ज्ञानयोर्विहितभक्तेश्च करणानसंभवतीति तस्य किं फलमित्याकांक्षायां पूरणाय तदन्नवदति तन्निर्हारणेन वदितान
स्मिन्धर्मेणापचनतत्र धर्मेषु पिटृष्टिर्यस्य सतस्याह दृष्टिपदे तज्ज्ञानमात्रमुच्यते तेनानन्यविषयकदर्शनश्रवणादिज्ञा
नाभावउक्तो भवति एतादृशस्य प्रभुसंगममात्रमपेक्षितं तत्र भगवदुक्तस्वसंगमत्वाधिकस्य भक्तस्य संगमस्य समय।
42 निर्द्धारो भवति अतो हृष्टास्यतस्य सने नितत्रिर्द्धारणानियमः एतेन फलप्राप्तेः प्रागवस्थाकाभवति फलस्वरूपमा
हृ पृथक्फलमिति त्रयस्यानिर्वचनीयत्वादन्नभवैकवेद्यत्वान्मोक्षांतेयत्फले प्रासउक्तं तस्माद्भिन्नमित्यर्थं अन्यत्रहिय
मीणां साधनत्वे यत्र फलमेव साधनं तत्फलस्यानित्यत्वात् प्रोक्तं वेतिद्दिपाहेनाह ज्ञानमोक्षादिना तद्भावा प्रतिबंधस्य फल
मित्यर्थः प्रासंगिकमेतत्सूत्रे प्रदानं च देवतउक्तं अथेदं विचार्यते सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यो नवेति।
तत्र गुणेन स्यात्वस्तु वोत्स्यपनुपक्रम्य मामेकमेव शरणं मात्मानं सर्वदेहिनां याहि सर्वात्मभावेन यास्यसे युक्तो
भयमिति वा केषु त्वात्मका उक्तो भयसाधनं नूपरशरणागमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वगम्य
तेऽतः साधनसाध्य इति पूर्वः यत्तत्त्वत्र सिद्धांते वक्ष्यते तदुपदेशस्वरूपमाह प्रदानवदिति यद्यपि साधनोपदेशः स्या
त्तथापि तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वं न त्वेव किं तु तत्र उक्तं भगवदुक्तं प्रदानं च तत्प्रकृष्टे दा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham